श्री.

श्रीमद्याकिनीमहत्तरासूनुहरिभद्राचार्यवर्यप्रणी

श्रीसर्वज्ञसिद्धिप्रकरणम्.

लक्ष्मीभृद् वीतरागः क्षतमतिरखिलार्थज्ञताऽऽश्लिष्टमूर्ति--र्देवेन्द्राच्योंऽप्रसादी परमगुणमहारत्नदोऽकिञ्चनेशः। तच्चातच्चेतिवक्ता नवित-थवचनो योगिनां भावगर्भं, ध्येयोऽनङ्गश्च सिध्धेर्जयति चिरगतो मार्गदेशी जिनेन्द्रः ॥ १ ॥ नास्त्येवाऽयं महामोहात्, केचिदेवं प्रचक्षते। कृपया तत्प्रबोधाय, ततः सन्न्याय उच्यते॥२॥ सर्वज्ञाप्रतिपत्तिर्यन्मोहः सामान्यतोऽपि हि। नास्त्येवाभिनिवेशस्तु, महामोहः सतां मतः॥३॥ अस्माच्च दूरे कल्याणं, सुलभा दुःखसम्पदः। नाज्ञानतो रिपुः कश्चिदत एवोदितं बुधैः ॥ ४ ॥ महामोहाभिभूतानामित्यनर्थो महान् यतः। अतस्तत्त्वविदां तेषु, कृपाऽवश्यं प्रवर्त्तते ॥ ५ ॥ श्रुत्वैतं चेह सन्न्यायं, तथा क्लिष्टस्य कर्मणः। क्षयोपशमभावेन, प्रबोधोऽप्युपपद्यते ॥ ६ ॥ तदभावेऽपि तद्दोषात्, सफलोऽयं परिश्रमः। कृपाभावत एवेह, तथोपायप्रवृत्तितः ॥ ७ ॥ श्रोतॄणामप्रबोधेऽपि, यन्मु--नीन्द्रैरुदाहृतम्। आख्यातॄणां फलं धर्मदेशनायां विधानतः ॥ ८ ॥ अलमत्र प्रसंगेन, प्रकृतं प्रस्तुमोऽधुना। पूर्वपक्षस्तु सन्न्यायस्तत्रातः किं-चिदुच्यते ॥९॥—प्रत्यक्षादिप्रमाण (णानां) गोचरातिक्रान्तभावतः। असाध्वी किल सर्वज्ञकल्पनाऽतिप्रसंगतः ॥१०॥ प्रत्यक्षेण प्रमाणेन, सर्वज्ञो नैव गृह्यते। लिंगमप्यविनाभावि, तेन किंचिन्न दृश्यते ॥११॥ नचाऽऽगमेन यदसौ, विध्यादिप्रतिपादकः। अप्रत्यक्षत्वतो नैवोपमाने-

नापि गम्यते ॥ १२ ॥ नार्थापत्त्या हि सर्वोऽर्थस्तं विनाऽप्युपपद्यते । प्रमाणपंचकावृत्तेस्तत्राभावस्य मानता ॥ १३ ॥ रागादिप्रक्षयाच्चास्य, सर्वज्ञत्वमिहेष्यते। तेषां चात्मस्वभावत्वात्, प्रक्षयो नोपपद्यते ॥ १४ ॥ अथ नात्मस्वभावास्ते, सर्वज्ञः सर्व एव हि । अरागादिस्वभावत्वान्न वा कश्चित् कदाचन ॥१५ ॥ किंच-जात्यादियुक्तत्वाद्, वक्ताऽसौ गीयते परैः । ततः कथं नु सर्वज्ञो?, यथोक्तं न्यायवादिना॥ १६ ॥ असाविति न सर्वज्ञो, वक्तृत्वाद्देवदत्तवत्। यं यं सर्वज्ञमित्याहुस्तं तमेतेन वारयेत् ॥१७॥ अवश्यं जातिनामभ्यां, स निर्देश्यः परैरपि। निर्दिष्टश्चेत् स वक्तृत्वादसर्वज्ञः प्रसज्यते ॥१८॥ सर्वो विशेषः सर्वज्ञो, वक्तृत्वेन ह्यपोद्यते । अपोदितविशेषं च, सामान्यं क्वावतिष्ठताम्? ॥१९॥ न वक्तृत्वमदेहस्य, न चासौ कर्मणा विना । न तद्रागादिशून्यस्य, वक्तृत्वं तन्निबन्धनम् ॥ २० ॥ विवक्षया च वक्तृत्वं, सा चेच्छाभावतो हि यत् । रागस्ततश्च वक्तृत्वात्, न सर्वज्ञ इति स्थितम् ॥ २१ ॥ अत्रोच्यते—

यत्तावदुक्तं 'प्रत्यक्षादिप्रमाणगोचरातिक्रान्तत्वादसाध्वी सर्वज्ञकल्पने' ति, तदयुक्तं, कुतः?, यतो न सर्वपदार्थग्राहीन्द्रियप्रत्यक्षमिति तद्गोचरातिक्रान्तत्वेऽपि भावानां नावश्यमसत्तासिध्धिरतिप्रसङ्गात्, तदगोचराणामपि सतामेवानुमानादिविषयतयेष्टत्वात्, अन्यथाऽनुमानादेरप्यसत्तामात्रत्वे सति अतिप्रसंगात्, न च सर्वजनप्रत्यक्षगोचरातिक्रान्तत्वे तत्र वः प्रमाणमस्ति, तच्चेतसां परोक्षत्वात्, तदभ्युपगमे चातीन्द्रियार्थदर्शिनः सत्तासिध्धिः, तत्संशयानिवृत्तेश्च, नहि सर्वजनगोचरातिक्रान्ता अपि वः खरविषाणादिवन्न सन्ति धर्मादय इति तत्संशयानिवृत्तिः । न चेदं तत्त्वतः प्रत्यक्षम्, असाक्षादसम्पूर्णवस्तुपरिच्छेदात्मकत्वात्, प्रयोगश्च-इन्द्रियमनोनिमितं विज्ञानमप्रत्यक्षं, ग्राह्यग्रहीतृव्यतिरिक्तनिमित्तोत्थापितप्रत्ययात्मकत्वात् धूमादग्निज्ञानवत्, विपक्षः केवलं, न प्रत्यक्षादिविरोधिनी प्रतिज्ञा, अस्य साक्षात्सम्पूर्णवस्तुपरिच्छेदायोगात्, अनीदृशस्य च प्रत्यक्षत्वानुपपत्तेः, नासिद्धो हेतुः, धर्मिधर्मत्वात्, यथोदितविज्ञानस्य हि ग्राह्यग्रहीतृव्यतिरिक्तनिमित्तोत्थापितप्रत्ययात्मकत्वं स्वभा-

Scanned by CamScanner

वतस्तथाप्रतीतेः, अतत्स्वभावत्वे तदनिमित्तत्वप्रसङ्गात्, नानैकान्तिकः, यथोदितविपक्षेऽभावात्, नहि केवले ग्राह्यग्रहीतृव्यतिरिक्तनिमित्तोत्थापितप्रत्ययात्मकत्वमस्ति, तस्य तथाविधात्मार्थनिबन्धनत्वात्, न विरुध्धोऽपि विपक्ष एवाभावात्, इन्द्रियोपलब्धिनिमित्तमन्तरा व्याप्त्यान्तराद्यपेक्षारूपत्वस्य प्रतीतिबाधितत्वात्, विशेषविरुध्धस्य तत्त्वतोऽविरुध्धत्वात्, अन्यथा सर्वत्र भावादेव च हेतुव्यवहारोच्छेदप्रसंगात्, दृष्टान्तोऽपि न साध्यादिविकलः, धूमादग्नेर्ज्ञानस्याप्रत्यक्षत्वासिध्धेः, ग्राह्यग्रहीतृव्यतिरिक्तनिमित्तोत्थापितप्रत्ययात्मकत्त्वप्रतीतेश्च, न साधनाव्यावृत्यादि, केवलादुभयस्यापि निवृत्तेः, आत्मनः साक्षादर्थपरिच्छेदात् सम्पूर्णार्थप्रतीतेश्च, आह-अधिकृतप्रत्यक्षेणापि साक्षादर्थपरिच्छित्तिः, न, अक्षैर्व्यवधानात्, तदभावेन तदभावात्, ज्ञानोत्पत्तिस्तेभ्यः तत्परिच्छित्तिस्तु साक्षादेवेति चेत्, न, तदव्यतिरेकेण तदसिध्धेः, अतत्स्वभावस्योत्पत्तौ पुनस्तत्स्वभावत्वविरोधात्, न चानेन सम्पूर्णवस्त्ववगमो, नीलादेरपि तारतम्यव्यावृत्त्याद्यपरिच्छित्तेस्तथाऽननुभवात्, नरसिंहे सिंहज्ञानतुल्यत्वादिति। अर्थस्वभावत्वकार्यत्वाभावे इन्द्रियादीनां तेन प्रतिबन्धासिध्धेः तदवगमे तेषां लिङ्गत्वानुपपत्तिरिति चेत्, न, ज्ञाप्यज्ञापकभावेन प्रतिबन्धासिध्ध्यसिध्धेः, न च सामग्र्यपेक्षया ग्राह्यवत् ज्ञानजननस्वभावत्वमेषां, सर्वथा तदभिन्नस्वभावत्वे ततस्तत्प्रतीतिप्रसंगात्, स्वभावभेदे च सिध्धमेषां ज्ञापकत्वमिति। आह-एवमप्यमीषां ज्ञापकधर्मातिक्रमः, अज्ञातज्ञापनात्, नहि धूमादाविव तज्ज्ञानादिपुरःसरमर्थज्ञानं, तथा सत्यभावात्, अक्षेपेणैवार्थप्रतीतेरिति, न, स्वभाववैचित्र्यतस्तद्भावसिध्धेरज्ञातज्ञापकस्वभावत्वात्, ज्ञापकस्वभावत्वं चेह प्रयोजकं, अन्यथा कार्ये व्यतिरेकस्तत्कारणत्वांगीकरणेऽपि तत्त्वतस्तद्वदेतेषां हेतुधर्मातिक्रमः, बुद्ध्यादियुतत्वाभ्युपगमाच्च, न चैतदनुपपत्तिर्ज्ञप्ते, तेषामेव त्वचेतनत्वेन ज्ञातृत्वायोगात्, किञ्च- परोक्षमात्रता चेह प्रतिपादयितुमिष्टा, ग्राह्यग्रहीतृव्यतिरिक्तनिमित्तमात्रत्वेनेत्यनुचितः सर्वसाधर्म्याभिनिवेशः, न चैवं केवलं, ग्राह्यग्रहीतृमात्रापेक्षितत्वात्, कर्मक्षयादेश्च क्षयोपशमादिश्च तुल्यत्वादित्यलं प्रसंगेन। नचाऽशेषपदार्थग्राह्यतीन्द्रि-

॥ ३ ॥

Scanned by CamScanner

यप्रत्यक्षगोचरातिक्रान्तत्वमस्योभयासिध्धेःअभ्युपगमविरोधात् विवादानुपपत्तेश्च,अनुमानगोचरातिक्रान्तत्वं पुनरसिध्धमेव,सर्वे धर्मादयःकस्यचित् प्रत्यक्षाः,ज्ञेयत्वाद् घटवत्, विपक्षो न किञ्चिदित्यनुमानसद्भावात्। अत्राह-नेदमनुमानं,तदाभासत्वात्, इह ह्यप्रसिध्धाविषेशणत्वादप्रासिध्धाविशेषणः पक्षः, तथाहि--सर्वे धर्मादयः कस्यचित् प्रत्यक्षा इत्यत्रातीन्द्रियप्रत्यक्षेण प्रत्यक्षत्वं साधयितुमिष्टं, न तत्कस्यचित् प्रसिध्धमिति हेतुरप्यनैकान्तिकः, अप्रत्यक्षस्याप्यभावस्य ज्ञेयत्वोपपत्तेः, दृष्टान्तोऽपि साध्यविकलः, जात्यन्तरप्रत्यक्षेण प्रत्यक्षत्वासिध्धेः, इतरोऽपि साधनाव्यावृत्तः नाकिञ्चिदिति तुच्छेऽपि ज्ञेयत्वानिवृत्तेरिति, अत्रोच्यते, यत्तावदुक्तमप्रसिध्धविशेषणत्वादप्रसिध्धविशेषणः पक्षः [इतरोऽपि साधनाव्यावृत्तविशेषणः] इत्येतदयुक्तम्, अनुमानोच्छेदप्रसङ्गात्, सर्वत्राप्रसिध्धविशेषणपक्षाभासत्वापत्तेः, एवं ह्यनित्यः शब्द इत्यादावपि वर्णाद्यात्मकव्यक्तिसमवाय्यनित्यत्वेनानित्यत्वं साधयितुमिष्टं, न तत् क्वचित् प्रसिध्धमित्यपि वक्तुं शक्यत्वाद्, अनित्यत्वजातिपरिग्रहाददोष इति चेत् इतरत्रापि प्रत्यक्षत्वजातिपरिग्रहे को दोषः?, इष्टासिध्धिरिति चेत् शब्दानित्यत्वादौ समान एव दोषः, लौकिकत्वादनित्यत्वादेरसमानता इतिचेत् ,न, अलौकिकस्यापि वेदापौरुषेयत्वादेर्मेयत्वेन त्वयाऽप्यङ्गीकृतत्वात्, हेतुरप्यदुष्टः, अभावस्याप्रत्यक्षत्वासिध्धेर्वस्तुधर्मत्वात् अन्यथा वस्त्वनुपपत्तेः, तस्य च प्रत्यक्षत्वात्, अतध्धर्मस्य चात्यन्तासतो ज्ञेयत्वायोगात्, मानेन ज्ञायमानस्य तदुपपत्तेः, तुच्छे च मानप्रवृत्त्यसम्भवादभावाख्यमानस्य च तदविशेषात् तद्वदप्रवृत्तेः। अपरस्त्वाह-सर्वज्ञज्ञानस्य ज्ञेयत्वेऽपि प्रत्यक्षत्वानुपपत्तेः, तेनार्थप्रत्यक्षत्वात्, तत्प्रत्यक्षत्वे च तदप्रत्यक्षत्वप्रसङ्गात्, तदन्यसर्वज्ञप्रत्यक्षत्वे चानवस्थापत्तेर्व्यभिचार इति, एतदप्यसत्, तस्यार्थग्रहणारूपस्य स्वसंविदितत्वेनोक्तदोषानुपपत्तरुभयप्रत्यक्षत्वात्, अन्यथाऽर्थप्रत्यक्षत्वासिध्धेः, हल्लेखशून्यस्याविकृतत्वेनात्मनो दर्शिनो दर्शनायोगात्, विकृतत्वे चार्थं पश्यतस्तद्विक्रियैव चिद्रूपाऽज्ञानमिति सर्वज्ञत्वानुपपत्तेश्च । अपरस्त्वाह-हेतुर्येनैव सहाविनाभूतो दृष्टस्तस्यैव गमको भवति, यथा धूमोऽग्नेः, न सद्भावमात्रात्

यस्य कस्यचित्, यथा स एव धूमः पानीयस्य, न चातीन्द्रियेषु भावेषु प्रत्यक्षत्वाविनाभावि ज्ञेयत्वं दृष्टं, कथं तत् तेषु तद् गमयेत्?,अत्रोच्यते, सामान्यतो दृष्टानुमाननीतिः तत्तेषु तद् गमयेत् इति, यथा गतिमानादित्यो देशान्तरप्राप्तेः, देवदत्तवादित्यत्र, तथाहि-न दिनकरे गतिमत्त्वेन देशान्तरप्राप्तिरविनाभूता दृष्टा, अथचासौ तद् गमयति, देवदत्ते दृष्टेति सा गमयतीति चेत् घटेऽपि प्रत्यक्षत्वेन ज्ञेयत्वमविनाभावि दृष्टमेवेति समानमेतत्, अतीन्द्रियप्रत्यक्षत्वेन न दृष्टमिति चेत् देवदत्तेऽपि न तथा गगनगतिमत्त्वेन देशान्तरप्राप्तिरिति समानमेव । न साधर्म्यदृष्टान्तदोषः, जात्यन्तरप्रत्यक्षेण तत्र प्रत्यक्षत्वासिध्धावपि सामान्येन प्रत्यक्षत्वे सिध्धेः न्याय्यमेव, विशेषानुगमाभावात्, न वैधर्म्यदृष्टान्तदोषः, न किञ्चिदिति तुच्छाभावतो ज्ञेयत्वनिवृत्तेः, प्रतिपादनोपायत्वात् तदभिधाने दोषोऽन्यथा निःस्वभावतया न ततो ज्ञानजन्मातिप्रसङ्गादिति ।

अथ चेदमनुमानम्-अनेकशास्त्रकलासंवेदनसमन्विते कस्मिंश्चित् पुरुषे सर्वज्ञ इत्युपचर्यमाणो व्यवहारस्तदन्यमुख्यापेक्षः, गौणत्वात्, शौर्यक्रौर्यादिमति चैत्रेऽसिंहे सिंहव्यवहारवत्, विपक्षश्चैत्रव्यवहार इति, नात्र प्रत्यक्षादिविरोधिनी प्रतिज्ञा, तल्लक्षणायोगात्, नासिध्धो हेतुस्तत्र गौणत्वस्योभयोः सिध्धत्वात्, नानैकान्तिकः विपक्षव्यावृत्तेः, न विरुध्धो दृष्टान्तवत् प्रमाणान्तरप्रासिध्धतदन्यमुख्यापेक्षत्वसाधनस्य तद्ग्राहकप्रमाणप्रसिध्ध्यभ्युपगमेऽनवकाशत्वात्, न साधनधर्माद्यसिध्धः साधर्म्यदृष्टान्तः, उभयधर्मप्रासिध्धेः, नासाधनाव्यावृत्तादिरितरः, चैत्रे स्वव्यवहारात्तदुभयनिवृत्तेरिति । आगमगोचरातिक्रान्तत्वमप्यसिध्धं, ‘ स्वर्गकेवलार्थिना तपोध्यानादि कर्त्तव्य ’ मितिवचनप्रामाण्यात्, केवलिनश्च सर्वज्ञत्वात्, पुरुषकर्तृत्वादिदमप्रमाणमिति चेत् न तावद् वक्तृत्वेन तत्कर्तृकत्वासिध्धिः, न चैतत् स्वतन्त्रविरोधि ‘नमस्तीर्थाये’ तिवचनात्, न च पुरुषवक्तृकत्वमप्यस्याप्रामाण्ये निमित्तं, वेदाप्रामाण्यप्रसङ्गात्, न च तदवक्तृका वेदाः, पुरुषव्यापारमन्तरेण नभस्येतद्वचनानुपलब्धेः, अनुपूर्वीनियतिभावादेश्चेतरत्रापि तुल्यत्वात्, नच।ईदृवक्तृकत्वेनास्य प्रामाण्यं, निश्चिताविपरीतप्रत्ययोत्पादकत्वेन कथञ्चित् स्वत एव तदभ्युपगमाद्,

Scanned by CamScanner

अन्यथा तदनुपपत्तेः, अनुपपत्तिश्चास्य प्रमाणाभावात्, तस्य चोपादानेतरनिमित्तप्रभावेन स्वपराधीनत्वात्अर्थग्रहणपरिणामप्रत्ययान्तरानुभवतः, स्वपरत एव ज्ञप्तेः, कर्मकरणनिष्पाद्यस्य तदुभयापेक्षित्वेन स्वपरतःस्वकार्यप्रवर्त्तनात्, न च विज्ञानस्यार्थपरिच्छेदलक्षणोऽपि धर्मो व्यतिरिक्त एव, तस्यायमिति सम्बन्धानुपपत्तेः, कथञ्चिदव्यतिरेके च तद्वत्तस्यापि भावः, न च ज्ञानस्यापि न परतः 'इन्द्रियमनोऽर्थसन्निकर्षो हि ज्ञानस्य हेतु' रितिवचनात् परतो भावसिध्धेः, न चागमनित्यत्वेऽपि सर्वज्ञकल्पनावैयर्थ्यं, तस्य विहितानुष्ठानफलत्वात्, न चादृश्यत्वेनास्य फलकल्पनानुपपत्तिः,स्वर्गादिभिरतिप्रसङ्गात् ,न च ते सुखादिरूपत्वाद् दृश्या एवेति न्याय्यं,प्रकृष्टसुखविशेषस्यादृश्यत्वात् ,न च सुखमात्रानुभवरूप एव स्वर्गः, अतिप्रसंगात् , यतःकुतश्चित्तदभावेन चोदनानर्थक्यापत्तेश्च,न च सुखसामान्यदर्शनात् वः प्रकृष्टतद्विशेषसम्भवानुमानमबाधकं,ज्ञानसामान्यदर्शनेन प्रकृष्टतद्विशेषसम्भवानुमानप्राप्तेः, स्यादेतद्-अर्हन्नेवागमस्य वक्ता(केवल्युक्तत्वं)केवलित्वाच्चास्य तदुक्तानुष्ठानफलत्वमितीतरेतराश्रयदोषः न च वेदवक्तृष्वपि हिरण्यगर्भादिषु समानत्वात्तेषामपि विशेषेण तदुक्तानुष्ठानफलत्वात् , अनादिमत्त्वादस्य तद्वन्त एव वक्तार इति चेदितरत्रापि समानमेतत् , अर्हतामप्यनादित्वाभ्युपगमात् ,तेऽन्यवेदवक्तृवेदवक्तार इति चेदर्हन्तोऽप्यन्यार्हदुक्तागमवक्तार इति समानमेव,तदन्यार्हदुक्तत्वानपेक्षित्वेन तेषां तद्वक्तृत्वादसमानमिति चेन्नानपेक्षित्वासिध्धेः, तयैवानुपूर्व्याऽभिधानात् , अन्यार्हन्मुखाधीतागमवक्तारो न भवन्तीत्यसमानमेवेति चेन्न, जातिस्मरणातिशयवेदवक्तृत्ववत् केवलातिशयतस्तदा तथाऽऽगमवक्तृत्वेऽन्यार्हन्मुखातत्वस्याप्रयोजकत्वात् , अन्यदा चान्यतद्वक्तृत्वमुखाधीतत्वस्य तत्रार्हत्यपि समानत्वात् , अवेदत्वादागमस्यासमानमिति चेन्नावेद एवागमे न्यायमार्गतुल्यतावाःप्रतिपादयितुमिष्टत्वाद् , अन्यथा वेदस्याप्यनागमत्वात् नास्मदुक्तन्यायानुपातित्वमिति वक्तुं शक्यत्वात्, भवदागमप्रामाण्ये विगानमिति चेत् ? वेदप्रामाण्येऽपि तुल्यमेतत् , तथापि स एव प्रमाणं नागम इति चेन्न कोशपानादृते प्रमाणाभावात्, एवमितरेतराश्रयदोषानुपपत्तेश्चोदनानुष्ठानफलत्वेनागमात् सिध्धः सर्वज्ञ

इति । उपमानगोचरातिक्रान्तत्वमपि न न्यायसङ्गतमुपलब्धसर्वज्ञस्य हृद्गताशेषसंशयपरिच्छेदादिना तदन्योपलब्धौ तत्सादृश्यप्रतीतिसिध्धेः,अगृही-
तगोगवयस्य गव्यप्यसिध्धेः, न चैतावता गोस्तद्गोचरातिक्रांतत्वं, अनभ्युपगमात् , न स केनचिद् गृह्यत इत्यसिध्धं, विकल्पानुपपत्तेः, तथाहि-किं
प्रमाणेन न गृह्यते उताप्रमाणेन वेति वाच्यं?, यद्यप्रमाणेन सिध्धं साध्यते,तस्याप्रमाणेन ग्रहणानभ्युपगमात् ,अथ प्रमाणेन किं तद्ग्राहकेणोतातद्-
ग्राहकेणेति?,न तावत्तद्ग्राहकेण, तस्य तद्ग्रहणविरोधात्,तथाहि-तद्ग्राहकं न च त द् गृह्णातीतिविरुध्धमेतत् ,अतद्ग्राहकाग्रहणे तु तदभावासिध्धिः,
तदभावेऽपि घटादिभावसिध्धेः, तथाहि-न पटादिग्राहकेण प्रमाणेनागृह्यमाणा अपि सन्तो न सन्त्येव घटादयः, तद्ग्राहकं प्रमाणमेव नास्तीति
चेदुच्यते किं भवत एवोताहो सर्वप्रमातॄणामिति?, यदि भवत एव सिध्धं साध्यते, भवतः परोक्षत्वात् प्रवचनार्थानवगतेश्च, अथ सर्वप्रमातॄणा-
मित्यत्र न प्रमाणं, तच्चेतसामप्रत्यक्षत्वाद्,अन्यथा तद्भावनिश्चयानुपपत्तेः, तत्प्रत्यक्षताभ्युपगमे च तत्संवेदनवतः तथाऽतीन्द्रियोपलम्भकत्वा-
भ्युपगमात् तद्भावसिध्धिरेव, प्रधानादीनामप्येवं प्रतिषेधानुपपत्तितः तत्सत्तापत्तेर्यत्किञ्चिदेतदिति चेन्न, स्वतोऽदर्शनादतीन्द्रियोपलम्भकपुरु-
षवचनत औत्सुक्यानुपपत्तेश्च तत्प्रतिषेधसिध्धेः,असर्वज्ञेन तद्ग्रहणमपि न युक्त्युपपन्नमिति चेन्न, हृद्गताशेषसंशयच्छेदादिना तद्ग्रहणोपपत्तेः ।
असम्पूर्णवैयाकरणादिरप्यवगतकतिपयपृष्टसूत्रादिकाथितयथावास्थितार्थतत्त्वैः सम्पूर्णवैयाकरणादिग्रहणदर्शनात् , सर्वत्र तथा तद्व्यवहारसिध्धेः,
अन्यथा तदुच्छेदप्रसङ्गात् , अब्राह्मणेन ब्राह्मणपरिज्ञानानुपपत्तेः,तत्स्वयंकथनस्य सर्वज्ञेऽपि तुल्यत्वाद् ,हृद्गताशेषसंशयपरिच्छेद्यपीदानीं न काश्चि-
दुपलभ्यत इति चेत् सत्यमिदं,इहेदानीं कालदोषतस्तदनभ्युपगमात् , तदानीमासीदित्यपि कथं ज्ञायत इति चेत्तदुपलब्धसम्प्रदायाविच्छेदेन, न स
दुःसम्प्रदाय इत्यत्र किं प्रमाणमिति चेद् ब्राह्मण्याधिगमसम्प्रदायेऽपि समानमेतत् ,तद्व्यवहारबाधाऽभावदर्शनादसमानमिति चेन्न,इतरत्राप्युभयभा-
वात्समानमेव, दृश्यते च वेदाध्ययनादिवत्तन्नमस्कारस्थापनादिर्बाधारहितो व्यवहार इति, अगृहीतगोगवयस्यापि गोरिव नोपमानगोचरा-

Scanned by CamScanner

तिक्रान्तत्वमेव, एतेनासर्वज्ञपुरुषसाधर्म्यादसर्वज्ञत्वोपमानमेव तत्र युक्तमिति यदुच्यते परैस्तदपि प्रत्युक्तं, न चोपमानोपमेययोः प्रसिध्धसाधारणधर्मातिरेकेण सर्वधर्मैरुपमानप्रवृत्तिः, यथा शस्त्री श्यामा देवदत्ता, तत्र हि साधारणश्यामत्वावच्छिन्नरूपतैव केवलं प्रतीयते, नान्ये शस्त्रीगता धर्माः, तदध्यारोपे तु शस्त्रीरूपतैव स्यात्, इह चासर्वज्ञाः पुरुषा उपमानं उपमेयो विवक्षितः पुरुषविशेषः, कस्तयोः प्रसिध्धः साधारणो धर्म इति वाच्यं, वक्तृत्वपुरुषत्वादिरिति चेन्न, सिध्यसाध्यतापत्तेः, यथा पुरुषो वक्ता तथाऽयमपीत्यभ्युपगमात्, एतत्साधर्म्यसिध्या तत्रासर्वज्ञत्वस्यापि सिद्धिरिति चेत् न देवदत्तायामपि श्यामत्वसिध्धेः तैक्ष्ण्यादि भावप्रसङ्गात्, दृष्टविरोधादप्रसंग इति चेदितरत्र तद्विरोधाभावः केन सिध्ध इति वाच्यं, तद्भावोऽपि केन सिध्ध इति चेदविरुध्धविधेस्तेन विरोधेन सहावस्थानाभावनियमाभावतस्तत्सम्भवोपपत्तेः, अविरुध्धश्च ज्ञानप्रकर्षो वक्तत्वादिनेति । अर्थापत्तिगोचरातिक्रान्तत्वं युक्त्यनुपपन्नमेव, 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यादौ दृष्टस्य हवनादेः श्रुतस्य च स्वर्गादेरर्थस्य तत्साध्यसाधनसम्बन्धज्ञातारमन्तरेणानुपपत्तेः, अशक्यश्चायं पुरुषेण ज्ञातुमृतेऽतीन्द्रियार्थदर्शनात्, अपरस्मात् पुरुषात् ज्ञायत इति चेत् सोऽपि तेन तुल्यः, नैवंजातीयकेष्वतीन्द्रियेष्वर्थेषु तज्ज्ञानप्रामाण्यमुपैत्यन्धानामिव ज्ञानं रूपविशेषेष्विति, एतेनानादिवृद्धसम्प्रदायः प्रत्युक्तः, सर्वेषामेवात्र वस्तुन्यन्धतुल्यत्वात्, अधिकृतवचनादेवासौ विज्ञायत इति चेत्, न, वाक्यार्थप्रातिपत्तावपि तन्निश्चयानुपपत्तेः, लौकिकवाक्ये क्वचित्तद्भावेऽप्यर्थतथाऽभावदर्शनात्, तस्य पुरुषबुद्धिप्रभवत्वेन तदायत्तोऽर्थतथाऽभावो नैवमस्य अपौरुषेयत्वादिति चेत्, न, एवमप्यधिकृतभेदवत्तदर्थभेदाशङ्कापत्तेः, प्रदीपवत् स्वार्थप्रकाशनाद नाप त्तिरितिचेत्, न, प्रदीपार्थवदविशेषेण तदर्थप्रतिपत्त्यसिद्धेः, सङ्केतादनेकधा तदर्थोपलब्धेस्तत्स्वभावत्वादनेकार्थत्वाच्च तस्यादोषइति चेत्, न, तथा विरुद्धार्थानुपपत्तेः, दृश्यते च 'सर्वं विद्यस्ये' त्यादौ सङ्केतभेदे न तदस्तित्वविरुद्धार्थप्रकाशनमिति, नास्तित्वमेव तत्राविपरीतमिति चेत्, न, इतरप्रकाशनानुपपत्तेः, प्रदीपेन्दीवररक्तप्रकाशवदुपपत्तिरिति चेत्, न, अविशेषेण

तत्प्रकाशनप्रसङ्गात्, अदृष्टदोषात् तत् (तथा हि) प्रकाशनमिति चेत्, न, इतरत्राप्यविश्रम्भप्रसङ्गात्, तदेवादृष्टदोषात् नेतरदिति निश्चायकप्रमाणाभावात्, अतीन्द्रियार्थत्वाद् तत्साक्षात्कारिणश्चानभ्युपगमात्, तद्व्यतिरेकेण च तद्विशेषावगमोपायाभावादिति समाश्रीयतामतीन्द्रियार्थसाक्षात्कारी, तदभावे सतीष्टार्थासिद्धिरिति, तद्भावेऽप्यतादृशस्यातीन्द्रियार्थत्वात् तद्विवक्षावगमोपायाभाव इति चेत्, न, शब्दस्य प्रयोगकुशलप्रयुक्तस्य क्वचित् तदवगमनस्वभावत्वात्, अर्थमात्रप्रतिपत्त्या प्रतारके तद्याथात्म्यानवगम इति चेत्, न, भगवतो वीतरागत्वेन प्रतारकत्वानुपपत्तेः, प्रकृष्टौदासीन्यभावेन वीतरागस्य देशनानुवृत्तिरयुक्तेति चेत्, न, औदासीन्येनैव प्रवृत्तेः, तथाहि-न भगवतस्तिर्यङ्नरामरेषु देशनाया विशेषः, यथाबोधं प्रवृत्तेः, तथाप्रवृत्तिरप्येकान्तौदासीन्यबाधिनीति चेत्, न, तस्या अन्यनिमित्तत्वात्, प्रवचनवात्सल्यादिनिमित्तप्रागुपात्ततीर्थकरनामकर्म्मनिर्जरणहेतुत्वात्, उक्तं च– "तं च कहं वेइज्जइ ? अगिलाए धम्मदेसणादीहि" मित्यादि, तत्कर्म्मभावे तत्क्षयायोपायप्रवृत्तेः कृतकृत्यत्वानुपपत्तिरिति चेत्, न, अनभ्युपगमात्, न हि भवस्थस्य भगवतः क्षीणमोहस्याप्येकान्तेन कृतकृत्यत्वमिष्यते, भवोपग्राहिकर्म्मयुक्तत्वात्, अन्यनिमित्तापि प्रकृष्टौदासीन्यबाधिनी प्रवृत्तिस्तदवेति चेत्, न, स्थितिप्रवृत्त्या व्यभिचारात्, साऽप्रवृत्तस्यापि स्वरसत एवेति चेत् तथाविधकर्म्मयुक्तस्य देशनाप्रवृत्तिरप्येवंकल्पेत्यदोषः, अतीर्थकरवीतरागदेशनाप्रवृत्तिरयुक्तेति चेत्, न, अनभ्युपगमात्, न हि सामान्यकेवलिनस्तथा देशनायां प्रवर्त्तन्त इत्यलं प्रसङ्गेन।

यच्चोक्तं 'प्रमाणपञ्चकावृत्तेस्तत्राभावस्य मानते' त्येतदप्ययुक्तं, विकल्पानुपपत्तेः, तथाहि-असावभावः किं प्रमाणपञ्चकविनिवृत्तिमात्रं अभाव एवाहोश्विदात्मा ज्ञानविनिर्मुक्तः उताहो उपलब्ध्यन्तरात्मक इति, न तावत्तुच्छ एव, तस्य निरुपाख्यत्वेन तदभावपरिच्छेदकत्वानुपपत्तेः, ज्ञानस्य हि परिच्छित्तिर्धर्मो नाभावस्य, न-चाभावपरिच्छेदकज्ञानजनकत्वमस्य अभावत्वविरोधात्, तज्जननशक्त्यभावे तदनुत्पत्तेरतिप्रसंगात्,

तदभ्युपगमे भावत्वापत्तिः, किंच-अभावाद् भवतीति कारणप्रतिषेधात्तज्ज्ञानस्य निर्हेतुकत्वतः सदाभावादिप्रसंगः, अथात्मा ज्ञानविनिर्मुक्तः, ततोऽपि तदभावानिश्चयाभावः, ज्ञानशून्यत्वात्, ज्ञानस्य च निश्चयो धर्म्म इति, अथ ' चैतन्यं पुरुषस्य स्वरूप'मिति वचनात् तदेव निश्चय इति, न तर्हि ज्ञानविनिर्मुक्तः, तस्यैव ज्ञानत्वादिति, अथोपलब्ध्यन्तरात्मकः, ततोऽपि तदभावनिश्चया भावः, तदविषयसंसर्गेण तद्ग्रहणासिद्धेः, न चान्यत्वाभाववत् निश्चयो, न्यायविदः स्वभाववैचित्र्यतस्तत्सत्त्वाशङ्काऽनिवृत्तेः, तदविषयसंसर्गेण तद्ग्रहणाभ्युपगमे च न तस्यैकान्ततोऽ-सत्त्वमिति, अन्यस्त्वाह—अभावो ह्यभावज्ञानमेव, प्रमेयं त्वस्य तुच्छं, न चायं कुलालादिवद् घटादौ व्यापारमनुभूय स्वपरिच्छेदकज्ञानहेतुः, अपितु विज्ञेयतामात्रात्, न चास्येयमप्ययुक्ता, प्रमेयत्वानुपपत्तेः, न च स्वजन्यज्ञानपरिच्छेद्यत्वेन भावत्वापत्तिः, भावज्ञानपरिच्छेद्यस्य तद-भ्युपगमात्, न चानेनाविकृतोऽभावो न गम्यते, षष्ठास्तिकायवत् नास्ति सर्वज्ञ इत्यभावप्रतीतिरिति, एतदप्यसत्, अधिकृतज्ञानस्यापि तत उत्पत्त्यसिद्धेः, संयोगादिप्रतिषेधसंख्येतरकायापेक्षमनोविज्ञानात्मकत्वात्, अस्य चापरिमाणत्वात्, परिणीतितः इष्टविषयानुत्पत्त्या तत्परिच्छेदा-योगात्, इतश्चाप्रमाणत्वं, नास्ति देवदत्त इत्येवमपि प्रवृत्तेः, न चेदमक्षव्यापारजं, भाववत्तत्राक्षव्यापारानुपपत्तेः, अरूपाद्यात्मकत्वात्, अक्षस्य च विषयान्तरेऽप्यप्रवृत्तेः, न च वस्तुविशेषणीभूतत्वेनास्य ग्रहः, तथाविधस्य तद्विशेषणत्वासिद्धेः सम्बन्धाभावात् तादात्म्यतदुत्पत्त्यनुपपत्तेः, विशेषणविशेष्यभावस्य च तदप्रत्यक्षतया कल्पनायोगात्, वस्तुधर्म्मस्य च एकान्ततुच्छत्वाभावतः स्वराद्धान्तविरोधाभावः, न हि पररूपाभावः स्वरूपभावपृथग्भूत एवेत्येकान्ततुच्छताभावः, न चैवमसर्वज्ञे सर्वज्ञाभावावगमो नेष्यते, न चैवमपि तत्तुच्छतैव, तद्भावस्येतरत्राभावात्, एकान्तं-तुच्छभावस्य वातुच्छे तदतदभाव एवाभावादित्यतो नास्ति षष्ठोऽस्तिकाय इति, प्रसिद्धोपादान एवाप्रमाणभूत एव विकल्पः, न साक्षात्तुच्छगो-चरस्तदप्रतिभासनेन विधिनिषेधाविषयत्वात्तस्येति, अपराभावानवगमादेवास्तिकायेषु संख्यानियमादिसिद्धिरिति सूक्ष्मधिया भावनीयं। यथोक्तं

Scanned by CamScanner

'रागादिप्रक्षयादि' त्यादिना रागादीनामात्मस्वभावत्वात् प्रक्षयानुपपत्तिरिति, एतदप्ययुक्तं, पद्मरागकार्त्तस्वरमलस्य तत्स्वभावत्वेऽपि क्षारमृत्पुटपाकादेः प्रक्षयोपपत्तेर्विशुद्धिकल्याणतादर्शनात्, तदतत्स्वभावत्वे सर्वस्य पद्मरागादेर्विशुद्ध्यादिप्रसङ्गः, अमलस्वभावत्वात्, नवा कस्यचित् कदाचिद्, अमलस्वभावत्वेऽपि पूर्ववदनुपपत्तेः, न पद्मरागादेर्मलं सांसिद्धिकं, भिन्नवस्तुत्वेन तदुपरंजकत्वादिति चेत्, आत्मनोऽपि रागादिषु तुल्यः परिहारः, तथाहि-रागादिवेदनीयकर्म्माणवोऽप्यात्मनो भिन्नवस्तुतामनुभवन्तस्तदुपरंजका इति तत्त्वनीतिः, निसर्गशुद्धस्य कथं तदुपरंजकाः कथं वा न भूयोऽपवर्गावस्थायामिति चेत्, पद्मरागादिष्वपि समानमेतत्, न ते निसर्गशुद्धा मलेनोपरज्यन्ते, किन्तु तद्ग्रस्ता एवोपजायन्त इति चेत् आत्मन्यपि रागाद्यपेक्षया तुल्यमेतत्, अनादित्वात् स नोत्पद्यते इति चेत् अनादिरेव तद्ग्रस्त इति कोऽत्र दोषः?, कृतककर्मभेदत्वात्तेषामनादित्वविरोध इति चेत्, न, कृतकत्वेऽप्यनुभूतवर्त्तमानभावातीतकालवत् प्रवाहतोऽनादित्वासिद्धेः, अन्यथा प्राक्कालाभावतोऽबीजत्वेन पश्चादपि तदभावापत्तिः, न ह्यसत् सद्भवति, अतिप्रसंगात्, न चाननुभूतवर्तमानस्यातीतता, वर्त्तमानकल्पं च कृतकत्वमिति, आह-कुतः पुनरमीषां प्रक्षय ? इति, उच्यते, प्रतिपक्षभावनातः, सा चानेकान्तभावना, तत्प्रतिपक्षादुपेक्षासम्भवसामर्थ्यदर्शनात्, इह यतो यद्भवति तत्प्रतिपक्षान्न तद्भवितुमर्हतीति न्यायः, गुणदोषैकान्तग्रहाच्च रागद्वेषौ, अतस्तत्प्रतिपक्षभूतादनेकान्तत एवोपेक्षासम्भवो नान्यथा, तथाहि—उभयात्मकैकत्वोपग्रहादुपेक्षैव दृश्यते स्त्रीशरीरादिषु तद्विदां, तस्यां गुणा दोषाश्च, ततः किमनयेति व्यवहारदर्शनात्, सा चोपेक्षा संवरवतां सत्त्वानां, निमित्तताऽभावेन अभावादागंतुकमलस्य, तच्चोपेक्षा परिणामादिहेतुतः प्रक्षयात् प्राक्तनस्य, समासादयतां ज्ञानवृद्धिं सूक्ष्मेक्षिकयापि वस्तुनि पश्यतां तदतदात्मकत्वमभ्यासातिशयेन प्रकृष्टौदासीन्यरूपा जायत इति प्रयासः, तदेव परमार्थतो वीतरागत्वं, उक्तं च— " औदासीन्यं तु सर्वत्र, त्याज्योपादानहानितः । वासीचन्दनकल्पानां, वैराग्यं नाम कथ्यते ॥१॥" इति, प्रपञ्चितमेतद्भावनासिद्धाविति नेह प्रयासः । यच्चोक्तं

किंच जात्यादियुक्तत्वादेवमादिना। असर्वज्ञत्वसंसिध्यै, प्रमाणं तत् परीक्ष्यते ॥ असाविति न सर्वज्ञो, वक्तृत्वाद् देवदत्तवत्। तत्र किंचितज्ञ
इष्टश्चेत्, न ज्ञातं तेन किं मतम्? ॥ २ ॥ यदि यागादिविधयो, मिथ्यार्थत्वेन निश्चिताः। प्रोक्ता हिंसादयः सर्वे, यतो दुर्गतिहेतवः ॥ ३ ॥
अन्यत्वे च विरोधे वा, नञर्थश्चद्विकल्प्यते। यमपेक्ष्य विरुद्धोऽसावन्यो वा सहि सर्ववित् ॥४॥ विपरीतज्ञ इष्टश्चेन्नन्वनेकांतदर्शनम्। प्रमाण-
संगतं तेन, नैतदप्युपपद्यते ॥ ५ ॥ इत्येवं कुत्सितज्ञश्चेत्, कुत्सिता नरकादयः। तज्ज्ञानसाधने तस्य, भवेदिष्टप्रसाधनम् ॥ ६ ॥ अथ
किंचिन्न जानीते, तादृग्वक्ता कथं भवेत्? । एवं तावत् प्रतिज्ञार्थः, सर्वथा नोपपद्यते ॥ ७ ॥ परप्रकल्पितस्यैव, व्यवच्छेदोऽथ साध्यते।
तदयुक्तं यतः शब्दो, न ते भावं व्यपोहते ॥ ८ ॥ सर्वज्ञत्वेन वक्तृत्वं, यतश्च न विरुध्यते। अतस्तेन स सन्न्यायात्, तदभावोऽत्र गम्यते
॥ ९ ॥ असर्वज्ञाविनाभूतं, दृष्टं सर्वत्र तद्यतः। ततोऽसर्वज्ञसंसिद्धेर्ननु कस्मान्न गम्यते? ॥ १० ॥ सर्वत्र दर्शनासिद्धेरतीतादेरदर्शनात्।
न तुल्यमाग्निधूमाद्यावनोऽग्नेर्धूमभावतः ॥ ११ ॥ एवं यद्यन्यभावोऽसौ, [स] सकृदप्यन्यथा ततः। न धूमः स्यान्न चेदेवं, वक्तृत्वं तन्नि-
बन्धनम ॥ १२ ॥ कथं न तुल्यभावेऽपि, ननु सर्वस्य सर्वथा। अनन्तभूतदोषादेरात्मनस्तु तदुद्भवात् ॥ १३ ॥ अग्निदोषाद्यनादृत्य, धूमो-
ऽप्यत्राग्निहेतुकः। अन्यथाऽन्योऽपि तस्येत्थं, गमयेत् स्फुटनाद्यपि ॥ १४ ॥ जानाति बहु यः सम्यग्, वक्ति किंचित् स तत्र यत्। जानानः
सर्वमप्येव, ननु कस्मान्न वक्ष्यति? ॥ १५ ॥ सर्वज्ञेन क्वचिद् दृष्टमसर्वज्ञत्वजं यदि। न तद्दृष्टौ न दृष्टं यत्, तत्र तन्नेत्ययुक्तिमत् ॥१६॥
न चादर्शनतोऽस्यैव, साम्राज्यस्यैव नास्तिता। सर्वैरदर्शनं चास्य, पूर्वमेव निराकृतम् ॥१७॥ साध्येनाप्रतिबन्धित्वाद्, व्यभिचार्येव सूरिणा।
विपक्षे बाधकाभावादुक्तस्तत्रापि सम्भवात् ॥ १८ ॥ देवदत्तोऽपि सर्वत्र, ज्ञानवैराग्यजा गुणाः। सदसत्त्वेन निश्चेतुं, शक्यन्ते नैव सर्वथा
॥ १९ ॥ कायवाक्कर्मवृत्त्यापि, गुणदोषे न निश्चयः। बुद्धिपूर्वोऽन्यथापि स्याच्छैलूषस्येव संसदि ॥ २० ॥ न यतो वीतरागत्वे, तथा चेष्टोप-

Scanned by CamScanner

पद्यते । क्लिष्टा प्रयोजनाऽभावान्ननु तत् किं न निश्चयः॥२१॥तथा नाम स्वभावत्वे, भवोपग्राहिकर्म्मणः । कदाचिदुचितैर्यैत्र, ततः किं नोपपद्यते? ॥ २२ ॥ साक्षादगम्यमानेषु, ततस्तत्र विनिश्चयः । त एवं नैवमितिवा, छद्मस्थस्य न युज्यते ॥ २३॥ न चात्र यस्तु सर्वज्ञः, स वक्ता नेति शक्यते । वक्तुं तथाऽप्रसिद्धत्वादुच्यते चेन्न युक्तिमत् ॥ २४ ॥ तदभावादथावृत्तिस्तव हेतोर्न मानतः । स सिद्ध. इति सन्न्यायाद्, व्यतिरेको न पुष्कलः॥२५॥ यच्चोक्तं 'न वक्तृत्वमदेहस्ये' त्यादिना वक्तृत्वं रागादिनिबन्धनमित्येतदपि पारम्पर्येण तेषां तन्निबन्धनत्वे दोषाभावात् अबाधकमेव, इष्यन्त एव हि भगवताऽतीता रागादयः, न च तन्निवृत्तौ तत्कार्यत्वेन तदैव देहनिवृत्तिप्रसङ्गः, तेषां तन्निमित्तकारणत्वात् तदभावेऽपि कार्यस्य कियन्तमपि कालमवस्थानाविरोधात्, खनित्राद्यभावेऽपि घटादिविनाशासिद्धेः, उपादाननिबन्धनं किमस्य वक्तृत्वस्येति ? चेद्, उच्यते, भाषाद्रव्याण्यात्मप्रयत्नश्च, अत एव क्वचित् प्रक्रान्तवस्तुनि रागाद्यभावेऽपि सतां साक्षादेव वक्तृत्वोपलब्धेः, अन्यथा तदभावप्रसङ्गात् ; तथा सति व्यवहारोच्छेद इति, यच्चोक्तं-- " विवक्षया च वक्तृत्व " मित्यादि, एतदप्ययुक्तं, विवक्षामन्तरेणापि क्वचित् वक्तृत्वसिद्धेः, सुप्तमत्तादिषु तथा दर्शनात्, तत्रापि साऽस्त्येवेति चेत्, न, तथा प्रतीत्यभावात्, प्रबुद्धादावुक्तस्मरणानुपलब्धेः,तथापि तत्कल्पनेऽतिप्रसंगः, कातरविवक्षायां क्वचिच्छूरशब्दप्रयोगदर्शनात्. तत्राप्यन्तराले शूरविवक्षाऽस्तीति चेन्न, प्रमाणाभावात्, तच्छब्दप्रयोगान्यथानुपपत्तिः प्रमाणमिति चेत्, न, सन्देहानिवृत्तेः, अविवक्षापूर्वकत्वेऽपि विरोधासिद्धेः, तदभावे त्वहेतुकत्वेन सदा तच्छब्दप्रयोगापत्तेर्विरोधसिद्धिरिति चेत्, न, अहेतुकत्वासिद्धेः, तथाविधभाषाद्रव्यात्मप्रयत्नहेतुकत्वात्, तेषां च तथाविधत्वस्यादृष्टादिनिबन्धनत्वात्, अन्यथा विवक्षाया अपि सदाभावेनोक्तदोषानतिवृत्तेः, अमनस्कत्वेन च भगवत इच्छानुपपत्तिः, तथा वाग्योगस्य च चेष्टामात्रत्वात्, ततश्च सा चेच्छाभावतो हि यद्राग' इत्येतदप्यपार्थकमेव, तत्रेच्छाभावासिद्धेः, भावेऽपि शुद्धेच्छाया रागायोगात्, तथा लोकप्रतीतेः. ततश्च वक्तृत्वादसर्वज्ञ इति वाङ्मात्रमेव । संक्षेपादिति सर्वज्ञः, सन्न्याये क्त्या निदर्शितः । सामान्येन विशेषस्तु, ज्ञेयस्तद्वाक्यतो बुधैः ॥ १ ॥ वाक्यालिंगा हि वक्तारो, गुणदोषविनिश्चये । क्रिया-

Scanned by CamScanner

लिंगा हि कर्त्तारः, शिल्पमार्गे यथैव हि ||२|| दृष्टशास्त्राविरुद्धार्थं, सर्वसत्त्वसुखावहम् | मितं गंभीरमाल्हादि, वाक्यं यस्य स सर्ववित् ||३|| एवंभूतं तु यद्वाक्यं, जैनमेव ततः स वै | सर्वज्ञो नान्य एतच्च, स्याद्वादोक्त्यैव गम्यते ||४|| न नित्यैकान्तवादे यद्, बन्धमोक्षादि युज्यते | अनित्यैकान्तवादेऽपि, बन्धमोक्षादि युज्यते || ५ || जीवः स्वभावभेदेन, बध्यते मुच्यते च सः | ऐक्यापत्तेस्तयोर्नित्यं, तथा बन्धादिभावतः || ६ || तयोरत्यन्तभेदेऽपि, न बद्धो मुच्यते क्वचित् | एवं च सर्वशास्त्रोक्तं, भावनादि निरर्थकम् || ७ || नाचेतनस्य बन्धादि, केवलस्यैव युक्तिमत् | अप्रतीतेस्तदेकत्वनित्यत्वादेश्च सर्वथा ||८|| सन्तत्यपेक्षयाऽप्येतन्निरन्वयविनाशिषु | तदभावात्तथा भेदादेकान्तेन न युज्यते || ९ || एतच्च सर्वमन्यत्र, प्रबन्धेनोदितं यतः | ततः प्रतन्यते नेह, लेशतस्तूक्तमेव हि || १० || अतः स्याद्वादनीत्यैव, परिणामिनि बोद्धरि | तथा चित्रस्वभावे च, सर्वं बन्धादि युज्यते || ११ || य एव बध्यते जीवो, मिथ्यात्वादिसमन्वितः | कर्म्मणा मुच्यते सम्यक्त्वादियुक्तः स एव हि || १२ || बद्धोऽहमिति निर्वेदात्, प्रवृत्तिरपि युज्यते | परिणामित्वतस्तस्य, तत्क्षयाय कदाचन || १३ || तपःसंयमयोगेषु, कर्म्मबन्धदवाग्निषु | प्रवृत्तौ तत्क्षयाच्छुद्धिर्मोक्षश्चानुपचारतः||१४|| स तादृक्किं न निर्वेदात्, सर्वेषामेव देहिनाम् | युगपज्जायते किंच, कदाचित् कस्यचिन्ननु ? || १५ || अनादिभव्यभावस्य, तथाभावत्वतस्तथा | कर्म्मयोगाच्च निर्वेदः, स तादृक् न सदैव हि || १६ || स्यादनेकान्तवादेऽपि, स स्यात् सर्वज्ञ इत्यपि | न्याय्यमापद्यते तेन, सोऽपि नैकान्तसुन्दरः ||१७|| स्वगतेनैव सर्वज्ञः, सर्वज्ञत्वेन वर्त्तते | न यः परगतेनापि, स स इत्युपपद्यते || १८ || अन्यथाऽन्यगतेनापि, वर्त्तनात्वेन सोऽन्यवत् | अन्यः स्यादित्यनेकान्तादेव तद्भावसंस्थितिः || १९ || अन्येषामिव भावानां, स्वसत्ता तद्बलाद्यतः | अतः संचिन्त्यतां सम्यक्, कथं नैकान्तसुन्दरः? || २० || एवं च सिद्धः सर्वज्ञस्तद्वाक्यात् जिन एव तु | तस्मादलं प्रसंगेन, सिद्धार्था हि यतो वयम् ||२१|| कृत्वा इदः प्रकरणं भुवनैकसारं, सर्वज्ञरत्नगतमोहविनाशहेतुः | यत्पुण्यमार्जितमनेन समस्तपुंसां, मात्सर्यदुःखविरहेण गुणानुरागः || २२ || इति **सर्वज्ञसिद्धिप्रकरणं समाप्तम्** | **कृतिः सिताम्बराचार्यश्रीहरिभद्रपादानाम्** |